उपशास्त्री - II साहित्य - तृतीय - पत्रम्

किरातार्जुनीयम् महाकाव्यम्

प्रथमःसर्गः

Date __/__/____

द्विषान्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥

प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - शत्रुभिः कृतेयं भवतां दशा न तु दैवेनेति-कृत्वा मन्मानसं सुतरां दुनोति। यतो हि परैरपर्यासितवीर्य-सम्पदां मानवतां कृते विपदपि उत्सव इव कथंचित् सोढुं शक्या एव भवति। भाग्यवशादुपस्थिता विपद् मानभङ्गेन विना सोढुं शक्यतेऽभिमानशीलैः न तु कदापि मानहानिः।

व्याख्या:- यत = क्योंकि। इयं दशा = (तुम्हारी) यह दशा। द्विषन्निमित्ता = शत्रुओं के कारण हुई है। ततः = इसलिए मे मनः = मेरे मन को। समूलम् = जड़ से। उन्मूलयति इव = उखाड़ जैसी रही है। परै = शत्रुओं से। अपर्यासितवीर्यसम्पदाम् = न हराई गई है पराक्रमरूप सम्पत्ति जिनकी ऐसे। मानिनां = अभिमानियों का। पराभवः = हारना। अपि = भी। उत्सव एव = उत्सव ही है।

Renu Devi
07/12/20
राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया।

Page No.

शास्त्री - I साहित्य

सप्तमोऽङ्कः अभिज्ञानशाकुन्तलम्

Saathi

Date __ / __ / __

प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहतां महीयसाम् ।
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः॥

प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति ।

व्याख्या:— अस्मिन् श्लोके महर्षेः कश्यपस्य प्रभावात् सफलमनोरथोऽपि राजा दुष्यन्तो पुनरपि प्रियं पार्थयते — दयासिन्धो महर्षे! भवदीयानुग्रहाद् अहं सफलाभिलाषं सम्पन्नः नातः परं किमपि प्रार्थनीयमस्ति । तथापि यदि भवान् प्रियं चिकीर्षति तर्हीदमस्तु - समस्ताः पृथ्वीपतयः स्वसुखनिरपेक्षाः सन्तः प्रजानामेव श्रेयसे सर्वदा प्रवर्तन्ताम्, महाकविनां सरस्वाः कविताश्च सहृदयानां हृदयेषु चमत्कारं जनयित्वा विशिष्टसम्मानं लभन्ताम्, सर्वशक्तिशाली पार्वतीपतिः परमेश्वरश्च जन्मान्तरं निरस्य शाश्वतं पदं दिशत्विति शम् ।

अत्र समुच्चयालङ्कारः रुचिरा वृत्तंचास्ति ।

Ranu Devi
07/12/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

उपशास्त्री - I  साहित्य - तृतीय - पत्रम्

किरातार्जुनीय महाकाव्यम्

प्रथमः सर्गः

Date ___/___/_____

वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥

अन्वय-प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति—

व्याख्या:- वनान्तशय्याकठिनीकृताकृती = वन भूमि में सोने से कठोर हो गई है देह जिनकी ऐसे। विष्वक् = चारों ओर। कचाचितौ = केशों से व्याप्त। (अर्थात् जिनके सिर के बाल बढ़कर देह के चारों ओर लटके हैं ऐसे) अगजौ = पहाड़ में उत्पन्न। गजौ इव = हाथियों की तरह (दीखते हुए) एतौ यमौ = इन जुड़वाँ (नकुल-सहदेव) को। विलोकयन् = देखते हुए (भी)। त्वं = तुम। धृतिसंयमौ = संतोष और धैर्य को बाधितुं = छोड़ने के लिए। कथं न उत्सहसे = क्यों नहीं तैयार होते।

भावार्थ:- भूमिशयनात् संजातकर्कशशरीरौ विकीर्णरूक्षमूर्धजौ चैतौ यमजौ नकुलसहदेवौ विलोक्य कथमिदानीमपि त्वं संतोषं धैर्यं चावलम्बसे इति महाश्चर्यम् ।

Renu Devi
07/12/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.